तृतीयभागः

सप्तमः पाठः

# ७. गीतोपदेशः

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे के के सन्ति? तत्र किं प्रचलति?

२. महाभारतं केषां कथा?

३. नित्यजीवने के के उपदेशं कुर्वन्ति?

## पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।



१. देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।

భావం - దేవతలను, బ్రాహ్మణులను, గురువులను జ్ఞానులను పూజించడం, శారీరకశుభ్రత, నిజాయితి, బ్రహ్మచర్యం, అహింస అనునవి శారీరిక తపస్సులు.



२. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।

భావం - మనస్సుకు బాధకలిగించనివి, సత్యము, ప్రియము మరియు హితముతో కూడిన మాటలు, నిరంతర అధ్యయనము అనునవి వాచికతపస్సులు.



३. मनः प्रसादः सौम्यत्वं, मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते।।

భావం - నిశ్చల మనస్సు, మృదుత్వము, మౌనము, మనోనిగ్రహము, అంతఃకరణశుద్ధి అనునవి మానసికతపస్సులు.

SCERT TELANGANA

**४. श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
**स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्॥**

భావం - చక్కగా ఇతరుల ధర్మాన్ని పాటించుట కంటె లోపాలు ఉన్నప్పటికీ మన ధర్మాన్ని మనం పాటించటం మంచిది. స్వభావసిద్ధమైన కర్మల నాచరించుట వల్ల పాపం కలగదు.


**५. नियतं कुरु कर्म त्वं, कर्म ज्यायो ह्यकर्मणः।**
**शरीरयात्रापि च ते न प्रसिध्येदकर्मणः॥**



భావం - అర్జునా ! నీవు చేయవలసిన కర్మలను సక్రమంగా ఆచరించు. ఏ పని చేయకుండా ఉండడంకంటే ఏదో ఒక పనిని చేస్తూ ఉండడం మేలు. పని చేయని సోమరులకు పూట గడవడం కూడ కష్టమే గదా !

**६. यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥**

భావం - పెద్దలు ఎలా ప్రవర్తిస్తారో అలాగే సామాన్యులు ప్రవర్తిస్తారు. సదాచారం పట్ల పెద్దలు ఏర్పరచిన ప్రమాణాన్నే సామాన్యజనులు అనుసరిస్తారు.



SCERT TELANGANA



# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. एकैकं चित्रं पश्यन्तु। चित्रे के के सन्ति? ते किं किं कुर्वन्ति इति वदन्तु।

आ. एकैकचित्रस्य भावं वदन्तु।

इ. स्वीयवाक्यैः एकस्य श्लोकस्य भावं वदन्तु।

ई. श्लोकभावं चित्रस्य भावेन सह तोलयन्तु।

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पठन्तु। पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा अर्थान् अवगच्छन्तु।

| | | | | |
|---|---|---|---|---|
| अभ्यसनम् | श्रेयान् | आप्नोति | प्रमाणम् | श्रेष्ठः |
| अनुवर्तते | आर्जवम् | वाङ्मयम् | उच्यते | मनःप्रसादः |

आ. सर्वान् श्लोकान् सस्वरं गायन्तु।

इ. तपः कति विधम्?

ई. श्लोकानां भावान् पठित्वा स्वीयवाक्यैः वदन्तु।

उ. श्लोकपादान् योजयन्तु, लिखन्तु।

| | |
|---|---|
| १) देवद्विजगुरुप्राज्ञ | (अ) न प्रसिध्येदकर्मणः |
| २) श्रेयान् स्वधर्मो विगुणः | (आ) तत्तदेवेतरो जनः |
| ३) शरीरयात्रापि च ते | (इ) पूजनं शौचम् आर्जवम् |
| ४) यद्यदाचरति श्रेष्ठः | (ई) तपो मानसमुच्यते |
| ५) भावसंशुद्धिरित्येतत् | (उ) परधर्मात्स्वनुष्ठितात् |

उदा- देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।

ऊ. मञ्जूषातः पदानि चित्वा तत्तत्तपसः अनुगुणं लिखन्तु।

| | | | |
|---|---|---|---|
| देवपूजनं | अनुद्वेगकरं वाक्यं | प्राज्ञपूजनं | प्रसादमनः |
| अहिंसा | सौम्यत्वं | द्विजपूजनं | सत्यवाक्यं |
| मौनं | भावसंशुद्धिः | गुरुपूजनं | स्वाध्यायाभ्यसनं |
| शौचम् | प्रियहितवाक्यं | ब्रह्मचर्यम् | आत्मविनिग्रहः |

SCERT TELANGANA

| शारीरम् | मानसिकम् | वाचिकम् |
|---|---|---|
| ............................ | ............................ | ............................ |
| ............................ | ............................ | ............................ |
| ............................ | ............................ | ............................ |
| ............................ | ............................ | ............................ |
| ............................ | ............................ | |
| ............................ | | |
| ............................ | | |

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. लोकः कम् अनुवर्तते?

२. कः धर्मः श्रेयः? कः धर्मः न आचरणीयः?

३. वाचिकतपः नाम किम्?

४. निरन्तराध्ययनम् नाम किम्?

### आ. पदानि पठन्तु। तेषां समानार्थकसंस्कृतपदानि पाठात् चित्वा अत्र लिखन्तु।

1. మనస్సుకు బాధ కలిగించని సత్యం ....................

2. మృదుత్వం ....................     3. పాపం ....................

4. నిజాయితీ....................     5. నిశ్చలమనస్సు ....................

6. అంతఃకరణం ....................



### इ. चिन्तयन्तु, लिखन्तु

१. अनुद्वेगकरं वाक्यं किमर्थं वक्तव्यम्?

२. स्वाध्यायः नाम कः?

३. मौनं कीदृशेषु सन्दर्भेषु आवश्यकम्?

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. मञ्जूषातः पर्यायपदानि चित्वा अधः दत्ते स्थाने लिखन्तु।

| | | | | | |
|---|---|---|---|---|---|
| कायः | ब्राह्मणः | उत्तमः | प्रपञ्चः | आर्यः | जगत् |
| विप्रः | भूसुरः | वरः | तनुः | देहः | भुवनम् |

१. द्विजः - .............. ................ ..................

२. शरीरम् - .............. ................ ..................

३. श्रेष्ठः - .............. ................ ..................

४. लोकः - .............. ................ ..................

### आ. अधः दत्तेषु पदेषु पूर्वपदस्य अन्तिमाक्षरम् उपयुज्य अनन्तरपदं लिखन्तु।

| | | | |
|---|---|---|---|
| वाक्यं | तपः | देव | यात्रा |
| प्रसादः | नियतं | मौनम् | कर्म |

उदा :- **कर्म, मौनम्** ---

## ५. व्याकरणांशाः



### अ. उदाहरणानुसारम् अधः दत्तपदानि विघटयन्तु।

उदा - शौचमार्जवम् - शौचम् + आर्जवम्

१. ब्रह्मचर्यमहिंसा - ........................................

२. मौनमात्मविनिग्रहः - ........................................

३. मानसमुच्यते - ........................................

४. स्वाध्यायाभ्यसनम् - ........................................

५. यद्यदाचरति - ........................................

SCERT TELANGANA

आ. एतानि पदानि पठन्तु। तेषां संयोजनम् अवगच्छन्तु।

| | | | |
|---|---|---|---|
| समर+अङ्गणम् - | समराङ्गणम् | जल+आशयः - | जलाशयः |
| सुमित्रा+आनन्दवर्धनः- | सुमित्रानन्दवर्धनः | अति+इन्द्रियः - | अतीन्द्रियः |

**अधः दत्तानि पदानि योजयन्तु।**

स्नान+अर्थम् - ..........................

स्व+आहारः - ..........................

विद्या+आलयः - ..........................

सुर+अरिः - ..........................

**अधः दत्तानां पदानां विभजनं कुर्वन्तु।**

विद्याभ्यासः - ..........................

प्रधानाध्यापकः - ..........................

कलुषिताहारः - ..........................

स्वाध्यायः - ..........................

**एतानि पदानि सवर्णदीर्घसन्धियुक्तानि।**

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. पाठान्तर्गतस्य षष्ठश्लोकस्य भावानुसारम् एकां कथां लिखन्तु।

आ. भगवद्गीताम् उद्दिश्य भाषणरूपेण वदन्तु।

## ७. परियोजनाकार्यम्



अ. भगवद्गीतायाः अध्यायानां नामानि ज्ञात्वा पट्टिकारूपेण लिखन्तु।

आ. भगवद्गीतायाः श्लोकान् कण्ठस्थीकुर्वन्तु।

SCERT TELANGANA

## ८. प्रशंसा



अम्बा - ललिते ! किमर्थं विलम्बेन आगच्छसि? हस्ते किमेतत्?

ललिता - अम्ब ! एतं पुरस्कारं भगवद्गीतास्पर्धायां प्राप्तवती।

अम्बा - तथा वा ! भगवद्गीता किम् उपदिशति?

ललिता - फलमनपेक्ष्य स्वस्वकार्याणि करणीयानि इति।

अम्बा - उत्तमः भावः।

(भवान्/भवती अपि भगवद्गीतायाः प्राशस्त्यं वदतु ।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. श्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि । | | | |
| २. श्लोकानां भावं वक्तुं शक्नोमि । | | | |
| ३. अनुद्वेगकरवाक्यं किमर्थं वक्तव्यम् इति लेखितुं शक्नोमि। | | | |
| ४. षष्ठश्लोकस्य भावानुसारम् एकां कथां लेखितुं शक्नोमि। | | | |

**सत्यं माता पिता ज्ञानम्**

SCERT TELANGANA